# Gorakhanatha Ashtakam

# ગોરખનાથાષ્ટકમ્

## Document Information

Text title : Gorakshanatha Ashtakam 2

File name : gorakShanAthAShTakam2.itx

Category : deities_misc, aShTaka

Location : doc_deities_misc

Author : netramaNi AchArya

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Description/comments : Goraksha Nikilavani Year 14-12, page 7

Latest update : December 14, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 14, 2022

*sanskritdocuments.org*

# ગોરખનાથાષ્ટકમ્

અષ્ટાઙ્ગયોગનિધિ અન્ધ વિનાશકર્તા
વેદાન્તસાર સુખ સાધક ક્લેશ હર્તા ।
ત્રિશૂલ ધૃક્ શિવ-મૃડ-કરુણા કરેશ
વન્દે સમસ્ત ગુરુ ગોરખનાથ તુભ્યમ્ ॥ ૧॥

ભિષક પરાત્પર મહેશ્વર સર્વ વ્યાપી
ૐકારરૂપ પ્રણવાત્મક ધ્યાનગમ્ય ।
દાતા દયાકર સનાતનધર્મ ધામ
ધેયઃ મહાપુરુષ ગોરખનાથ તુભ્યમ્ ॥ ૨॥

બધ્ધોઽસ્મિ હે પશુપતે ! જગમોહજાલે
હે નાથ ! મામપિવિલોકય દીનવન્ધો ।
તાપં મદીય મનસોહર અક્ષમાલી
વન્દે મહાપુરુષ ગોરખનાથ તુભ્યમ્ ॥ ૩॥

આનન્દરૂપ ધ્રુવ-તાણ્ડવ નૃત્યકારી
ઇષ્ટો વિશિષ્ટ જગપાલક હે કપાલી ।
દિગ્વસ્ત્રકાય વિધુ-ભાસ્કર અગ્નિ નેત્ર
ધેયઃ મહાપુરુષ ગોરખનાથ તુભ્યમ્ ॥ ૪॥

વ્યાઘ્રામ્બરા શ્રવણ દર્શન દર્શનીય
આનન્દમૂલ અખિલેશ્વર અપ્રમેય ।
સર્વોત્તમોત્તમ પ્રભા ભવરોગ હારી
વન્દે મહાપુરુષ ગોરખનાથ તુભ્યમ્ ॥ ૫॥

સમ્પૂર્ણ શાસ્ત્રમય શ્રી અવધૂત સિધ્દ
યોગેશ યોગવિષયાતિવ સુ-પ્રસિધ્દ ।
ગોર્ખેશ હે ! સકલ કારણ શાન્ત મૂર્તે !
ધેયઃ સમસ્ત ગુરુ ગોરખનાથ તુભ્યમ્ ॥ ૬॥

સ્વયં પ્રકાશ શુભ સ્વસ્તિદઃ ષટ્ ગુણેશ
 કલ્યાણદા અભયદા શિવ જ્ઞાન ગમ્ય ।
બ્રહ્માદિદેવ વર વન્દિત સાધુ-સાધ્ય
 વન્દે મહાપુરુષ ગોરખનાથ તુભ્યમ્ ॥ ૭॥

સંસાર-સમ્પ્લવ વિમોચન વન્દનીય
 ગોવંશ રક્ષક પ્રવર્ધક મૂલ ત્રાણ ।
વિઘ્નેશ નર્તક-સ્વતન્ત્ર અમોઘ વીર્ય
 ધેયઃ સમસ્ત ગુરુ ગોરખનાથ તુભ્યમ્ ॥ ૮॥

ઇતિ ગોરખનાથાષ્ટકં સમ્પૂર્ણમ્ ।

રચયિતા - કવિ નેત્રમણિ આચાર્ય, ગોરખા

ગોરક્ષનાથાષ્ટકં

Encoded and proofread by Chandrasekhar Karumuri

*Gorakhanatha Ashtakam*
pdf was typeset on December 14, 2022

Please send corrections to *sanskrit@cheerful.com*